धावकः श्रेष्ठः गवां कृष्णा गौः संपन्नक्षीरा ब्राह्मणानां क्षत्रियः शूरतमः छात्राणां मैत्रः पटुः स्याद्वि
निर्धारणे रथयोगे षष्ठी सप्तम्यौ स्तः गवां गोषु वा स्वामी स्वतः प्रभुरधिपतिर्दायाद प्रतिभूर्वा अन्व ॥स्व० १२॥
याधिके षष्ठी सप्तम्यौ रुद्रेण रुद्रे वा प्रयुञ्जीत आयुक्तः कुशलाभ्यां योगेऽपि तात्पर्ये आयुक्तः कु
शलो वा हरिपूजने हरिपूजनस्य वा तात्पर्ये किं आयुक्तः शकटे गौः साधुर्निपुणो मातृ जायां सप्तमी

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

इदाहरणे तरिः करोति घटः क्रियते कर्तृकारकवत्कर्म नष्टयाकस्मात् कंसं हतवान् कस्मिन् कंसो हतः
पचनो ऽग्निः दानीयो विप्रः उपाध्यायः पचनी स्थाली इत्येवमन्यत्रापि प्रमानेद उत्तरथः उपहृतपशुः उद्धृ
तान्नः पीताम्बरः वीरपुरुषः तद्धितो ऽप्येवं माथुरः कौङ्कुमं इत्यादि निपातस्य तु यो गोदेवी क्रः क्रमाद
मुनारद इत्यादयो ऽपि सः इति भिन्नरूपः समासः स्यान्नैव नाम्ना नाम्ना मन्वयपर्यायत्वे समस्यते समा
सो भवति चकारात् कृत्तद्धितधातुसंज्ञाप्रयोजकप्रत्ययाः स्युरिति च षड्विधः अव्ययीभावस्तत्पुरुषो द्व
द्विगुर्वे द्वन्द्वो बहुव्रीहिः कर्मधारयश्चेति स्त्रियमधिकृत्य भवतीति विग्रहे समासे व्ययस्य पूर्वनिपातः पूर्वे ऽव्ययो ऽव्य
यीभावः अव्ययपूर्वपदे सति यो ऽन्वयः सो ऽव्ययीभावः समासः स्यात् समासप्रत्यययोः लुक् समासे चले मानाया
विभक्तेः प्रत्यये च परे लुक् नामत्वात्स्यादयः स नपुंसकं सो ऽव्ययीभावो नपुंसकलिङ्गो भवति नपुंसकस्येति ह्रस्वः
अव्ययीभावाद्विभक्तेर्लुक् अधिस्त्रि रायमतिक्रान्तमतिरि कुले नावमतिक्रान्तमतिनु जले अतो ऽमनतः अद
न्ताद व्ययीभावाद्विभक्तेर्न लुक् अतः नपुंसके ऽमादेशः कुम्भस्य समीपमुपकुम्भम् बाधेको ऽदन्ताद व्ययीभावात्
इस्तोरम्वा उपकुम्भं उपकुम्भेन उपकुम्भे उपकुम्भात् अनतः किं उपकुम्भात् अव्ययीभावे ऽदन्ताद्विभक्तेरम् अ
न्यस्य कस्यचिद्विभक्तेर्लुगिति सारम् यवनानां व्यृद्धिः दुर्यवनं मक्षिकाणामभावो निर्मक्षिकम् विष्णोः पश्चादनु
विष्णु रूपस्य योग्यमनुरूपं हरेः सादृश्यं सहरि सक्तादेरिति सः अवधारणार्थे यावति च अवधारणार्थे याव
च्छब्दे सुपुञ्ज्यमाने यो ऽन्वयः सो ऽप्यव्ययीभावः स्यात् यावन्तः श्लोकास्तावन्तो ऽच्युतप्रणामा इति यावच्छ्लोकम् ।
क्वचिदनव्ययपूर्वपदे ऽप्यव्ययीभावः उन्मत्ता गङ्गा यस्मिन्देशे इत्युन्मत्तगङ्गं शाकस्य लेशः शाकप्रति कचि



CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

णादयसंबंधोन्वाचयः मिलितयोरेकत्रान्वयस्तत्रेतरयोगो यथा धवखदिरौ छिंद्धीति संहतिः समाहारो
यथा शशकुशपलाशमिति तत्राद्ययोर्न समासोऽस्यान्वयात् अन्ययोस्तु स्यात् द्वंद्वे लघ्वक्षरप्रधानैका
रेकारांतानां पूर्वनिपातः धवश्च खदिरश्च धवखदिरौ भोक्ता च भोग्यश्च भोक्तृभोग्यौ अग्निश्च मरुच्च अग्नि
मरुतौ पटुश्च गुप्तश्च पटुगुप्तौ इंद्रश्च यमश्च स्वरादंतस्य ईश कृष्णौ देवताद्वंद्वे पूर्वपदस्याकारः इं
द्राबृहस्पती अन्यासु क्वचिन्न अग्निवायू ईदग्नेः सोमवरुणयोः अग्न्यादेः सोमादीनां स्यात् अ
ग्नीषोमौ अग्नीवरुणौ समाहारे एकवद्भावः एकत्वे द्विगुद्वंद्वौ नपुंसकलिंगौ स्तः पाणिपादं बदरा
आमलकानि च बदरामलकं शशाश्च कुशाश्च पलाशाश्च शशकुशपलाशं इति द्वंद्वः संख्यापूर्वो द्वि
गुः संख्यापूर्वः समासो द्विगुर्निगद्यते समाहारेऽत ईप् द्विगुः समाहारे एष द्विगुः समासो भवति ततोऽका
रांतादीप् प्रत्ययः दशानां ग्रामाणां समाहारो दशग्रामी पंचाग्नयः समाहृता इति पंचाग्निः क्वचि
न्न पंचपात्रं त्रिभुवनं इति द्विगुः बहुव्रीहिरन्यार्थे अन्यपदार्थप्रधानो योऽन्वयः स बहुव्रीहिसंज्ञकः
समासो भवति बहुव्रीहौ विशेषणसप्तम्यंतक्तांतसर्वादिसंख्यानां पूर्वनिपातः बहुधनं यस्य स बहु
धनः कंठे कालो यस्य स कंठेकालः कृतः कटो येन स कृतकटः सर्वं प्रियं यस्य स सर्वप्रियः द्वौ पुत्रौ य
स्य स द्विपुत्रः क्वचिन्न चंद्रः शेखरे यस्य स चंद्रशेखरः चक्रं पाणौ यस्य स चक्रपाणिः बहुव्रीहिर्द्वि
धा तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्चेति तस्य प्रधानस्यैकदेशो विशेषणं तत्संविज्ञायते य
त्र स तद्गुणसंविज्ञानोऽन्योऽतद्गुणसंविज्ञानः यथा लंबौ कर्णौ यस्य स लंबकर्णः चित्रा गावो यस्य
स चित्रगुः नञ्दुःसुभ्यः प्रजामेधयोरसुक् अप्रजाः दुर्मेधाः सुमेधाः सुमेधसो धर्मादन् सोमनो

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

...अनुपविष्टो ऽनुपविष्टः बहिर्वनात् बहिर्वने प्राग्वनात् प्राग्वने आमुक्तेः आमुक्ति संसारः।
गिनि अध्यग्नि तिष्ठद्गुप्रभृतीनि च निपात्यन्ते तिष्ठन्ति गावो यस्मिन् काले स तिष्ठद्गु पारेगंगायाः पारेगंगं
मध्ये गंगायाः मध्येगंगं खलेयवा यस्मिन् काले तत् खलेयवं सप्तगंगाः समाहृता इति सप्तगंगं द्वयोर्मुन्योः स
माहृते इति द्विमुनं टडकाः समासे सति टज्डक इत्येते प्रत्ययाः स्युः शरदः समीपम् उपशरदं प्रतिविपाशं ज
रायाः जरसः उपजरसं अक्षिप्रति प्रत्यक्षं अक्ष्णः परं परोक्षं परशब्दस्य परस् परोक्षे इति ज्ञापकात् अक्ष्णः अनु अ
न्वक्षे उपराजं उपसमिधं क्वचिद्वा उपनदं उपनदि इत्यव्ययीभावः अथ तत्पुरुषः द्वितीयादिषु पूर्वपदे सति
यो ऽन्वयः स तत्पुरुषसंज्ञकः समासो भवति ग्रामं प्राप्तो ग्रामप्राप्तः कूपं पतितः कूपपतितः दात्रेण छिन्नं दात्रच्छि
न्नं पित्रा सदृशः पितृसदृशः यूपाय दारु यूपदारु भूतेभ्यो बलिः भूतबलिः चौराद्भयं चौरभयं व्याघ्रभीतिः
। राज्ञः पुरुषः राजपुरुषः द्विजयाजकः देवपूजकः क्वचिन्न षष्ठी न समस्यते न्यूनो द्विजः सत्ताधरः फलानां सु
हितः अपां स्रष्टा ओदनस्य पाचकः अक्षेषु शौण्डः अक्षशौण्डः शास्त्रे निपुणः क्वचिन्न सप्तमी समस्यते शयनीये स
त्तोऽतिशयः नावमतिक्रान्तोऽतिनौः पूर्वं भूतो भूतपूर्वः अन्नेन मध्यमः मध्यान्नः इत्यादि समासः क्वचिदलुक्
कालेऽस्तु शराणां वने शरवणे अम्बुवणे क्वचिद्वा सुरापाने सुरापाणे नञि नञि पूर्वपदे सति यो
न्वयः सोऽपि तत्पुरुषः स्यात् नञः समासे सति नञोऽकारादेशः स्यात् धर्मविरुद्धोऽधर्मः ज्ञानविरु
द्धं ज्ञाने अज्ञानं स्वरे समासे सति नञो ऽन् स्यात् स्वरे अश्वादन्यो ऽनश्वः निरनुबन्धकस्य नस्य तु नानो
नासत्यौ नक्षत्रं नैकधा इति तत्पुरुषः चार्थे द्वन्द्वः समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः
तत्रेश्वरं गुरुं च भजस्वेति प्रत्येकमेकक्रियान्वयः समुच्चयः भिक्षामट गां चानयेति क्रमेणैक

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा०
२०

स्यस व्यूढोरस्कः बहुलक्ष्मीकः इत्यादि कर्मधारयस्तुल्यार्थे ॥ कार्यनिरस्यपदद्वयस्यान्वये कर्म
धारयसंज्ञकः समासः स्यात् कर्मधारये विशेषणस्य पूर्वनिपातः नीलोत्पलं कर्मधारये पुंवद्भावः स्या
त् रक्ता चासौ लता च रक्तलता ब्राह्मणभार्या सुकेशभार्या नाम्नस्त्र्यन्ततासमासः प्रादिरुपसर्गस्य
नाम्नस्त्र्यन्तेन समासस्तत्समासः स च तत्पुरुषसंज्ञकः स्यात् प्रकृष्ट आचार्यः प्राचार्यः प्रवादः कुत्सितः कारः शाक
पार्थिवादीनां मध्यमपदलोपः शाकप्रियः पार्थिवः शाकपार्थिवः देवपूजको ब्राह्मणो देवब्राह्मणः स
हादेः सादिः समासे सति सहादेः सादिः स्यात् पुत्रेण सह वर्त्तमानः सपुत्रः सतां स्वनीतिः सध्रुङ् सम्यङ्
तिर्यङ् लक्ष्मीजाया यस्य स लक्ष्मीजानिः कुत्सितमन्नं कदन्नं ईषदुष्णं कवोष्णं कदुष्णं कोष्णं
कुत्सितः पुरुषः कुपुरुषः कापुरुषः षट् च दश च षोडश षट् दन्ता यस्य स षोडन् महांश्चासावीश्वर
श्च महेश्वरः महादेवः खरा नासिका यस्य स खरणसः खरणाः उन्नसः प्रणसः विगता नासिका यस्य स
विग्नः विग्रः चतस्रोऽस्रयो यस्य स चतुरस्रः प्रगते जानुनी यस्य स प्रज्ञुः संज्ञुः ऊर्ध्वज्ञुः शार्ङ्गं धनुर्य
स्य स शार्ङ्गधन्वा दुष्टो गन्धो यस्य स दुर्गन्धिः उद्गन्धिः सुगन्धिः क्षीरमुदकं यस्य स क्षीरोदः सुरोदः लवणो
दः ... वारिवाहको वलाहकः गृहात्मा दक्षिणतीरं दक्षिणतारः इत्यादि अलुक् उच्यते कचिल्ल
मासे तत्कृते कदन्ते पि विभक्तेर्लुक् कण्ठेकालः स्तोकान्मुक्तः आमुष्यायणः आमुष्यकुलिका आमु
ष्यपुत्रिका सरसिजं हृदिस्पृक् विशेषः कचिद्वा मातृपित्रोः स्वसृ सस्य षः मातुः पितुर्वा मा
तृष्वसा पितृष्वसा मातुःस्वसा मातुःष्वसा पितुःस्वसा देवानांप्रिय इति मूर्खे ऽन्यत्र देवप्रियः सं
ज्ञायां दिवोदासः शुनःशेपः शुनःपुच्छो ... अलुक्तरतमरूपकल्पचेलड्ब्रुवगोत्र ... मतहतेषु ह्रस्वत

स० २०

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

पितुःष्वसा

धर्मो यस्याः सो सुधर्मा रूपवती भार्या यस्येति विग्रहे समासप्रत्यययोरित्यनेन लुकि कृते अन्यार्थे
स्त्रीप्रत्ययान्तस्यान्यार्थे वर्तमानस्य ह्रस्वः पुंवद्भावः समासे सति समानाधिकरणे स्त्रीलिङ्गे परे पूर्वस्या
भाषितपुंस्कस्य रूपं पुंवद्भावः स्यात् रूपवद्भार्यः उक्तपुंस्कस्य किं कल्याणी द्वितीयः गङ्गाभार्यः तरतमचरट्क
ल्पदेशीयदेशीयरूपपाशादौ पुंवत् दर्शनीयतमा दर्शनीयतरा दर्शनीयतमा दर्शनीयचरी दर्शनीयकल्पा
दर्शनीयदेश्या दर्शनीयदेशीया दर्शनीयरूपा दर्शनीयपाशा त्वतलोर्गुणवचनस्य शुक्लाया
भावः शुक्लत्वं शुक्लता कुक्कुट्यादीनामण्डादिषु कुक्कुट्या अण्डं कुक्कुटाण्डं मृग्याः पदं मृगपदं सर्वा
देः समासादौ दक्षिणस्याः पूर्वस्या मध्ये या दिक् सा दक्षिणपूर्वा सर्वा प्रधानं यस्येति सर्वप्रधानः सा
र्वोङ्करोतीति सर्वकरः एकमानिनोः पुंवत् एनीवाचरतीति एतायते दर्शनीयां मन्यते दर्शनीयमानी
चैत्रः पुंवदसेति पुंवत् वैयाकरणभार्यः जातिवाचिनः स्त्रीप्रत्ययान्तस्य न शूद्राभार्यः [illegible]
र्थः संज्ञापूरणार्थप्रत्यययोर्न दत्ताभार्यः पंचमीभार्यः ऊङ्प्रत्ययान्तस्य न वामोरूभार्यः गोः गोशब्दस्या
न्यार्थे वर्तमानस्य ह्रस्वः स्यात् पंचगावो यस्य सः पंचगुः संख्यासुप्याद्यादिपूर्वस्य पादशब्दस्य लोपः
सहस्त्यादिवर्जस्य [illegible] द्विपात् [illegible]
[illegible] संख्या सुपात् द्व्यापात् स्वरे तद्धिते च परे योरीकारे च पादस्य पद् स्यात् सत्तस्य पद् स्
त्रीभिरित्यादिः टाङ्का समासे सति टङ्कऽङ्क्यते सुः मध्यान्हः पूर्वान्हः नो वा नान्तस्य पदस्य टेर्लोपः
स्याद्वा अणन्त्यः क्वचित् द्युपथाया अपि कवीनां राजा कविराजः कविराजा राज्ञोऽहः राजपुरं द्व
न्द्वे एकधुरं सर्वधुरं अत्र वचनत्रयं पञ्चधा बहवः कर्तारो यस्य स बहुकर्तृकः [illegible]

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भ्याँ

शा° २१

वपुसी: अर्द्धर्चं अर्द्धर्चः। ध्वजो ध्वजः। रूपवतीयशरीरमेऽपठय्यदेतत्संकुशाविप्रयोगज्ञो शास्त्र
म्। पुण्यसुदिनाभ्यां नन्दः। क्लीवता पुण्याहं सुदिनाहं संख्याव्ययाभ्यां परस्य पथः क्लीवता त्रिपथं वि
पथं सामान्येन पुंस्त्वं कृत्पूर्वेति प्रातःकमनीयं छायांतस्य [illegible] पूर्वपदार्थबाहुल्ये इक्षूणां छाया।
इ[illegible]क्षुच्छायं राजपर्यायपूर्वोरक्षः पिशाचादिपूर्वश्च सभांतः इनसभं ईश्वरसभं राजपर्यायेतिकिं वि
श्रुतसभा राजसभा रक्षःसभं पिशाचसभं संघातार्थे सभांतः स्त्रीसभं स्त्रीणां संघात इत्यर्थः सेनासुरा
छाया[illegible]शाला निशानां वा ब्राह्मणसेनं यवसुरं कुड्यच्छायं गोशालं श्वनिशं पक्षे ब्राह्मणसेना
दि इति समासः। अथ तद्धिताः। वाधिकारश्चातद्धितसमाप्तेः अपत्येऽण् षष्ठ्यंतान्नाम्नोऽपत्येऽर्थेऽण् प्र
त्ययः स्यात् आदिस्वरस्य ञ्णिति च वृद्धिः स्वराणां मध्ये य आदिस्वरस्तस्य वृद्धिः स्यात् ञिति णिति च ओ
रस्वरे उवर्णस्योतश्चाव् स्यात्तद्धितप्रत्यये स्वरे परतः उपगोरपत्यमौपगवः उपगोरपत्यमिति वा वाक्य
विकल्पात् वाशिष्ठः गौतमः संख्यासंभद्रपूर्वाया मातुरुर् स्यात् द्वयोर्मात्रोरपत्यं द्वैमातुरः साम्मातुरः भाद्रमातुरः
लिङ्गानि ईशाखामिमालि इति समकेतालस्यापत्यं सा[illegible] अत इञ् अदंतान्नाम्नोऽपत्ये शब्दादिञ् स्याद्दाक्षिः
वृष्णि वानरवि: बाह्वादिभ्यश्च बाहविः नाडिरित्याद्याकृतिगणोऽयम् सुधातृव्यासवरुडनिषादचण्डालबिं
म्बानां [illegible]ऽकिञ् च सौधातकिः नंदिषेणयोर्दृष्टं च संभिजयोर्थवृद्धिः स्वरस्य न वृद्धिः कि[illegible]
न्तुतपौदृश्य[illegible]स्य उ इञ् वैयासकिः वारुडकिः नैषादकिः चाण्डालकिः वैम्बकिः शिवादिभ्योऽण् इ
ञोऽपवादः शैवः वैष्णवः गर्गादिभ्यो यञ् गार्ग्यः जाजिनदाक्षिर्पिलुकस्यादि: जा[illegible]गादेर्यो नजदेरापनण्।
स्त्रीत्वादि स्त्री प्रत्ययानां च वरयणः पिञ् स्वसा देशीय: स्यात् गर्गस्यापत्यं गार्ग्यः वात्स्यः इत्यादि न स्यादपत्य

१९

इण्

स्व° २१

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्यानेकस्वरस्य ह्रस्वो भाषितपुंस्कस्य ब्राह्मणितरा ब्राह्मणितमा ब्राह्मणिरूपा ब्राह्मणिकल्पा ब्राह्म
णिचेली ब्राह्मणिब्रुवा ब्राह्मणिगोत्रा ब्राह्मणिगोत्रा ब्राह्मणिमता ब्राह्मणिहता अनीचेतस्या स्त्री
प्रत्ययान्तस्यैवैकस्वरस्य च वा ह्रस्वस्तरादौ ब्रूलेघुतरा ब्रूलेघुतरा स्त्रीतरा स्त्रितरा ३९
केषिकामालानां चितते लभारिपुत्रस्य: इषिकामिषिकीत इषीकाचित इषीकचित इषिकत
ले मालभारी इत्यादि: कारे सत्यागदस्य मुम् सत्यंकरोतीति सत्यंकार: अस्तोऽग्न अगदंकार: धेनो
र्भव्यायां धेनुंभव्या लोकस्य पृणे लोकंपृण: इत्यनभ्यासस्य अनभ्यासमित्य: भ्राष्ट्राग्न्योरिन्धे भ्राष्ट्र
मिन्ध: अग्निमिन्ध: गिलेऽगिलस्य तिमिगिलस्यागिलादौ किं गिलगिल: गिलगिलेच तिमिंगि ल
लगिल: रात्रेः कृति वा रात्रिंचर: रात्रिचर: रात्रिंमट: रात्र्यट: नोत्तिवर्तिहृषिव्यधिरुचिसहितनि
प्रा १८७ नियुक्तिकेवतेः पूर्वस्य दीर्घ: उपानत् नीवृत् मर्मावित् नीरुक् ऋतीषट् परीतत् मत्वर्थे बहुस्वरस्य
अमरावती शरादेश्च शरावती अजिरादेर्न अजिरवती आदेरुक्ते द्वंद्वे सतिपितृ विदादेर्ल्लो
प:स्यात् माता च पिता च पितरौ श्वश्रूश्च श्वशुरश्च श्वशुरौ ऋतोद्वंद्वे पूर्वपदस्यात्वं मातापित
रौ होतापोतारौ पुत्रेच पितापुत्रौ द्विकृते स्वे समासे द्विवाचिन: संख्यावाचिन: समानाधिकरणेन संज्ञायां समासस्य तत्पुरुषसंज्ञा दिग्वाचिन: संख्यावाचिन: समासामा
नाधिकरणेन संज्ञायामेवसमस्यतेऽसंज्ञामिवार्थ: दक्षिणाग्निः सप्तर्षय: संज्ञायां किं पंचकलानि
टिकं स्यात् किं अरण्यानि राजाहःसखिभ्यः पुंसि अतिराजः पूर्वरात्र: पूर्वाह्न: अहः संख्यापूर्वो रात्रा
क्लीबे द्विरात्रं त्रिरात्रं अपथं तत्पुरुषे क्लीबं अन्यत्र तु न पथ्यां प्रस्थिन पुंसि प्रशस्तोऽपथ: अर्धर्चादय: क्लीबे

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

चाक्षुषं रूपं श्रावणः शब्दः रासनः मरिचैः संस्कृतं मारिचिकम् उडुपेन तरतीत्यौडुपिकम् एवं ना-
विकम् नाव्यम् घटिकः बाहुकः इत्यादि मुद्गैः संसृष्टः ओदनः मौद्गः दध्ना उपसिक्तं दाधिकम् उरसा निर्मि-
त औरसः उरस्यो वा पुत्रः धर्मेण प्राप्यं धर्म्यं हस्तिना जीवतीति हास्तिकः वेतनेन जीवतीति वैतनिकः व-
पानुबद्धः आधिकः विंशाधिकः वयस्यात् तुल्यो वयस्यः सातत्ये न वर्तते सां[illegible]कः द्वारः आत्मनेपदमाह-
इति कर्तृकरणाभ्याम् वत्सेभ्यो हितो वत्सीयो गोधुक् गवे हितं गव्यम् एवं पशव्यं हविष्यम् दन्त्यम् कण्ठ्य-
म् सर्वेभ्यो हितं सार्वम् आत्मने हितम् आत्मनीनम् मातृभोगीणः पितृभोगीणः राजभोगीनः आदेर्दीर्घत्वे
वा पुंसे हितं पुंस्यं पौंस्नमितिवा कर्मणा उकञ् कर्मण्यो भवतीति कार्मुकः इति सम्प्रदानात् ग्रामादि-
भ्यो ग्राम्यः ग्रामीणः एवं माथुरः तैर्थ्यः औपाध्यायिकः पैतामहकः हेतुमनुष्येभ्यो वा रूप्यम् यहेतो समा-
दागतं समरूप्यं सममयम् समीयम् एवं देवदत्तरूप्यं देवदत्तमयम् देवदत्तीयम् न्यायादनपेतं न्याय्यम्
धर्म्यम् धर्म्यम् इत्यपादानात् सिन्धौ जातः सैन्धवः कान्यकुब्जः पर्वतीयः दिव्यः प्राच्यम् अवाच्यम् उदी-
च्यम् प्रतीच्यम् मुखपार्श्वतसोरीयः लोपो वाच्यः मुखतोभवं मुखतीयम् पार्श्वतीयम् मध्यान्मः मा-
ध्यमः प्राङ्मध्यरम्यः प्राङ्मध्यमः एवं लौकिकम् पारलौकिकम् त्यतनौ अव्ययेभ्यः कुत्रभवः कुत्रत्यः इ-
हभवः इहत्यः क्वत्यः ततस्त्यः अमात्यः अद्यतनः ह्यस्तनः श्वस्तनः सदातनः सनातनः सायन्तनः चिरन्तनः द-
क्षिणापश्चात्पुरसस्त्यण् दाक्षिणात्यः पाश्चात्यः पौरस्त्यः चिरपरुत्परारिभ्यस्त्नो वाच्यः चिरत्नं परुत्नं प-
रारित्नम् अग्रादिपश्चाद्डिमः अग्रिमम् आदिमम् पश्चिमम् अन्तिमम् समानतीर्थे गुरौ वा वसतीति

स्व॰२२

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सा।

नाडायनः चारायणः इत्यादि अत्रेरपत्यं आत्रेयः कापेयः वैनतेयः गाङ्गेयः पितृष्वसुरपत्यं पैतृष्वस्रीयः।
मातृष्वस्रीयः आभ्यामियण् ढकि लोपश्च पैतृष्वसेयः मातृष्वसेयः लुग्वाऽत्वे क्वचित् अपत्यार्थे उत्पन्न
स्य प्रत्ययस्य क्वचिल्लुक् स्यात् अत्रयः भृगवः रघवः इत्यादि गोत्रे वा अणादयो णितो वा स्युः वा ग्रहणादे
व क्वचिदणादयो णितो णित्याः क्वचिन्नाण्कार्यं क्वचिन्नित्यं क्वचिद्वैतिसारम् श्वशुरस्यापत्यं श्वशुर्यः श्वा
सुर्यो वा स्वस्रस्त्यं स्वस्रीयः कारकाख्यायुक्ते केनेयकाः कारकात्कई नईयइका अणादयः स्त्रीक्रावस्थायाम
अप्रत्ययाः अधीते वेदोपनाथिषु यथोचितेष्वर्थेषु स्युः क्रियायुक्ते कर्तरिक मणिश्चाभिधेये पदमधीते श्रो
तिपदकः क्रमकः धुरीणः सर्वधुरीणः युक्तमर्वं शुक्रियम् इदन्तु स्वालिङ्गमिदियम् शब्दं करोतीति शाब्दि
कः हलं वर्तनीति हालिकः पक्षिणो हन्तीति पाक्षिकः एवं मार्गिकः मात्स्यिकः वेदमधीतेति वैदिकः एवं
पौराणिकः कुमारीमुपपन्नः पतिः कौमारः व्याकरणमधीते वैयाकरणः स्वश्वे वेदस्तोवश्च दण्डमस्ती
ति दाण्डः एवं मर्घ्यः वद्यः पूज्यः इत्यादि दक्षिण्यः दक्षिणीयः संशयमापन्नः सांशयिकः धनेलब्धा धन्यः
वेशं गतो वैश्यः इति प्रायश कर्म मञ्जिष्ठया रक्तं वस्त्रं माञ्जिष्ठम् कौङ्कुमम् नील्या रक्तं नीलं विशिष्टेन
इष्ट वा शिष्टं साम एवं कालेयमित्यादि वस्त्रैः परिवृतो वास्त्रो रथः द्वैपिनो विकारो द्वैपः तेन परिवृतो द्वैपः।
एवं वैयाघ्रः चार्मः काम्बलः पाण्डुकम्बलादिनिः पाण्डुकम्बली परिवृत इति सत्त्वा द्वैप्यैन इत्यर्थे तेन नेत
च्छात्रैः परिवृतो रथः मनुना प्रोक्तो मानवो धर्मः वररुचिना कृतो वाररुचो ग्रन्थः कुशाग्रेः कृतो ... एवं मा
क्षिकम् कौलालिकं अक्षैर्दीव्यति जयति जितो वेत्याक्षिकः अभ्रा खनतीत्याभ्रिकः चक्षुषा गृह्यत इति

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

ता लघुत्वं लाघवं गरिमा गुरुता गुरुत्वं गौरवम् महिमा महता महत्वम् माहत्वं मह्

सार२३ इमनि हस्वादेर्लघोर्ऋकारस्यर. स्यादि. निपरे पृथोर्भाव: प्रथिमा पार्थवम् म्रदिमा मार्द
वम् द्रढिमा दार्ढ्यम् क्रशिमा कार्श्यं लघो: किम् कृष्णिमा हस्वादेः किं ऋजिमा बहो
र्लोपो भू च बहो: बहो: परेषामिमनादीनामिवर्णस्य लोप: स्याद्बहोश्च भूरादेश: बहोर्भावो भू

दै मा भूमानो वेति दमर्थे प्रथमान्ताद्देवतावाचिनोऽस्येत्यर्थे षष्ठ्यन्तादिदमर्थे चाणाद
यस्यु: इन्द्रो देवतास्येत्यैन्द्रं हविः पाशुपतम् बार्हस्पत्यम् सौम्यम् आग्नीषोमीयम् पित्र्यम् वा
यव्यम् रथस्येदं रथ्यम् चक्रम् हलस्येदं हालिकम् विष्णोरिदं वैष्णवम् गव्यम् कुल्यम् त्व
दीयम् मदीयम् तदीयम् यदीयम् अन्यस्येदं अन्यदीयम् देवस्वराजजनपराणां कुक्
ईये देवस्येदं देवकीयम् स्वकीयम् राजकीयम् जनकीयम् परकीयम् युष्मदीयम् अस्म
दीयम् युष्मदस्मदोरणीनयो युष्माकास्माकौ एकार्थे तु तवकममकौ युवयोर्युष्माकं
वा यौष्माकः यौष्माकीणः आवयोरस्माकं वा ऽयमास्माकः आस्माकीनः तवायम् ताव
कः तावकीनः ममायं मामकः मामकीनः क्वचिद्यलोपः कात्यस्यैमे कातीयाश्छात्राः गा
र्गीयाः स्वार्थे प्रज्ञादयः स्युः चौर एव चौरः रक्ष एव राक्षसः चत्वारो वर्णाश्चातुर्वर्ण्यम्
चातुराश्रम्यम् त्रैलोक्यम् षाड्गुण्यम् सैन्यम् सैन्यम् सान्निध्यम् सामीप्यम् दैवात दे स०२३
वता मृदस्तिकः मृत्तिका शस्तो प्रशंसायाम् प्रशस्ता मृत् मृत्सा मृत्स्ना भागरूपनाम

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

मुष्कर:

सार २८

कुञ्ज नग पांसु पाण्डुभ्योर: ऊषर: सुषिर: मुष्कोऽण्डः सोऽस्यास्तीति मधुर: खर: मुखर: कु
ञ्जो हस्तिहनु सोऽस्यास्तीति कुञ्जर: नगर पांसुर: पाण्डुर: [illegible] त्वच कच्छुर: धुर
म्याम: धूम: द्रुम: कुमुदादेर्वतु कुमुद्वान् नड्वान् वेतस्वान् नडशादाड्ड्वल: नड्वल: ।
शाद्वल: महिमाड् ऽतु महिष्मान् देश: शृङ्ग वृन्दाभ्यामारक: शृङ्गारक: वृन्दारक: फल
बर्हाभ्यामिन: फलिन: बर्हिण: मलादीमसे नौ मलीमस: मलिन: श्रद्धादेलु: दयालु
केशादेर्वा वा केशव: केशी: केशवान् मणिवो नागविशेष: हिरण्यवो निधि: अर्णसो
लोपश्च अर्णो जल तदस्यास्तीत्यर्णव: कृष्यादेर्वल: कृष्या सुत्योर्दीर्घश्च कृषीवल:
आसुतीवल: परिषद्वल ऊर्जस्वल: रजस्वला स्त्री भ्रातृवल: शत्रुवल: दन्तवलो ह
स्ती शिखावल: केकी ज्योतिषोन अपधालोप ज्योतिरस्यास्तीति ज्योत्स्ना तमसोर
उपधायाइकार: तमोऽस्यास्तीति तमिस्रा गोर्मिनि गोमी तुन्दादेर्वेल: तुन्दिल: तुन्दी
तुन्दिक: तुन्दवान् वाचोग्मिन् वाग्मी स्वादामिन्नेप्यर्थे स्वामीन: पर्वमरुद्भ्यां तपर्वत:
मरुत: ऊर्णाहं शुभंभ्योयु: ऊर्णायु: अहंयु: शुभंयु: तुण्डिवलिव[illegible]टेभ: वृद्धा नाभिस्तुण्डि:
स्यास्तीति तुण्डिभ: वलिभ: वटिभ: वातातिसारपिशाचेभ्यः इनकुक् वातकी अतीसार।
की पिशाचकी [illegible] शीतोष्णतृप्रेभ्यस्तदसहनेऽालु: शीतेनसहतेशीतालु: तप्रं दु:ख
तप्रालु: उष्णालु: हिमादेलु: हिमेलु: वलादूल: वलूल: वातात्समूहेच वातेनसहतेतस्य

स्वत २८

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

भागधेयः भागएव भागधेयम् रूपधेयम् नामधेयम् वतुल्ये तृतीयान्तात् क्रियासादृश्ये षष्ठीस
प्तम्यन्तात् द्रव्यादिसादृश्ये वत्प्रत्ययः देवदत्तेन तुल्यं देवदत्तवत् पठति यज्ञदत्तः चैत्रेण तुल्यं
चैत्रवत्पचति मैत्रः देवानामिव देववद्ब्राह्मणानां गस्ता मथुरायामिव मथुरावद् द्वारकायां रीतिः
अर्हेपि विधिमर्हतीति विधिवत् अस्त्यर्थे मतुः प्रथमान्तान्नाम्नोऽस्यास्मिन्वास्तीत्यर्थे
मतुः स्यात् बुद्धिरस्यास्मिन्वास्तीति बुद्धिमान् गोमान् शक्तिमान् श्रीमान् ज्योत्स्नादिभ्यो
ऽण् स्यात् ज्योत्स्नः तामिस्रः सैकतः शार्करः आम्भः तापसः पूर्णो मासोऽस्यामस्तीति पौर्ण
मासी तिथिः पौषी पौषो मासोऽस्यास्मिन्वास्तीति पौषो मासः एवं फाल्गुनः श्रावणेत्यादि अर्शआदे
श्च मत्वर्थे अर्शोस्यास्तीत्यर्शसः वैजयन्त्यस्यास्तीति वैजयन्तः नाविकः धनिकः मान्तोपधा
वत्विनो मान्तान्मोपधादवर्णान्तादवर्णोपधाच्चास्त्यर्थे वत्विनौ स्तो ऽदन्तात्विन् किम्वान् ।
लक्ष्मीवान् ज्ञानवान् विद्यावान् यशस्वान् भास्वान् ज्ञानी मौनी ध्यानी मायी तडि
दादिभ्यश्च तडित्वान् विद्युत्वान् यवादीनां यवमान् भूमिमान् अस्मायामेधास्रजो
विन् तपस्वी मायावी मेधावी स्रग्वी आमयस्य दीर्घश्च आमयावी सिध्मादिलेभ्यश्च
। सिध्मलः सिध्मवान् एवं चूडालः इत्यादि लोमपामपिच्छादिभ्यः शनेलाः वा लोमशः
लोमवान् गिरिशः पामनः अङ्गना लक्ष्मणश्च लक्ष्मणः पिच्छिलः तुन्दिलः फेनिलः ।
पक्षे वतुरपि श्रोतन्त्यदन्ताडुरः उन्नतास्योतिदन्तुरः अवस्थि मुक्केकमधुरवमुख

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सार२५

नेरिडकचिकस्यादेशा चिकिने चिपिटम् चिक्कम् क्लिन्नस्य चिल् पिल् चुलादेशा लप्रत्यय।
अक्ष्णश्चक्षुषी तदर्थे क्लिन्ने चक्षुषी अस्य चिल्लः पिल्लः चुल्लः उपाधिभ्यां त्यकन्नासन्नारूढयोः त्यकः
पर्वतस्यासन्नानरूढपत्यका अधित्यका कर्मणि घटते इत्यर्थे कर्मणि घटते इति।
कर्मठः इतो जातार्थे लज्जा जाता अस्येति लज्जितः इष्टादिभ्य इतिरनेनेत्यर्थे इष्टमनेन इष्टी अ
धीती अव्ययसर्वादेः प्रागकः उच्चकैः एवकम् त्वकं अमुकम् अज्ञातेकुत्सितनादिषु ।
कुत्सितमायते इति आचालः वावाटः प्राशंसायां रूपः प्रशस्तो वटुः वटुरूपः कुत्सायां पाशः कु
त्सितो वैयाकरणो वैयाकरणपाशः भूतपूर्वे चरट् पूर्वदृष्टो दृष्टचरः आढ्यचरी ईषदसमाप्तौ कल्पदे
श्यदेशीयाः ईषदसमाप्तः पटुः पटुकल्पः पटुदेश्यः पटुदेशीयः बहुच प्राग्वा ईषदूनः पटुः ब
हुपटुः प्रकारे जातीयः पटुप्रकारः पटुजातीयः ह्रस्वाल्पयोः कः ह्रस्वो वृक्षो वृक्षकः अल्पं तैल
तैलकम् कुटीशमीशुण्डाभ्यो रो ह्रस्वत्वे ह्रस्वा कुटी कुटीरः शमीरः शुण्डारः कुतोडुपः ह्रस्वा कुतूः कुतुपः
कासूगोणीभ्यां तरट् कासू आयुधविशेषः ह्रस्वा कासूः कासूतरी गोणीतरी वत्सोक्षाश्वर्षभेभ्यस्त
नुत्वे तनुर्वत्सो वत्सतरः उक्षतरः अश्वतरी ऋषभतरः एकाद्यात्किमस्तमाये नस्तमापोऽस्तीति
काको तरतमेयस्विष्ठप्रकर्षे ऽतिशायने एतेस्युः तत्र द्वयोरेकस्य प्रकर्षे तरप् बहूनामेक

सारा
२५

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

सम्बद्धो वा वातूलः पितुर्भ्रातरि व्यत् पितुर्भ्राता पितृव्यः मातुर्भ्रातरि डुलच् मातुर्भ्राता मातुलः ।
मातृपितृभ्यां पितरि मातरि च डामहच् मातुः पिता मातामहः पितुः पिता पितामहः मातुर्माता
मातामही तिलान्निष्फलात्पिञ्जपेजौ निष्फलस्तिलः पिञ्जः तिलपेजः पिल्वादिभ्यः कर्णादिभ्यः कु मिल
णजाहचौ पाकमूलयोः पीलूनां पाकः पीलुकुणः कर्णजाहम् पक्षात्तिः मूले पक्षस्य मूलं प
क्षतिः चञ्चुचणौ वित्ते विद्यया वित्तः विद्याचञ्चुः विद्याचणः विशालसंकटौ विस्तृते विशा
लं विशंकटं विशं प्राद्यः कटः विकटम् संकटम् प्रकटम् उत्कटम् अलाबूतिलोमाभंगाभ्यो
रजसि अलाबूनां रजोऽलाबूकटम् तिलकटम् उमाकटम् भंगाकटम् गोष्ठादयः स्थानादि
षु पशुनामभ्यः गवां स्थाने गोगोष्ठम् अश्वगोष्ठम् संघाते कटः अवीनां संघातोऽविकटः वि
स्तारे पटः अश्वानां विस्तारः अश्वपटः द्वित्वे गोयुगः द्वावश्वौ अश्वगोयुगम् षट्के षड्गवः षड्गजा
गजषड्गवम् स्नेहे तैलः तिलानां स्नेहः तिलतैलम् सर्षपतैलम् भवने क्षेत्रे शाकटशाकिनौ इ
क्षूणां भवनं क्षेत्रं इक्षुशाकटम् इक्षुशाकिनम् अवात्कुटारकटौ अवाचीनोऽवकुटारः अवकटः ।
नासिकाया नतेऽपि टीटनाटभ्रटाः अवात् नासिकाया नतम् अवटीटम् अवनाटम् अवभ्र
टम् तद्योगान्नासिकाऽवटीटा पुरुषोऽवटीटः नेर्बिडबिरीसचौ निबिडं निबिरीसं इनच्पिटच्का

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

स्वा
२६

पचतितमाम् अहश्चैतितकिम् उच्चैस्तमाम्‌ःद्वयोर्बहूनां चैकस्य निर्धारणे किमादिभ्यो डतरड
तमौ स्तः नयो कतरः कतमः एकतरः एकतमः यतरः ततरः वत्वेनाख्यार्थे द्वयसज्मात्रौ ता
वदेव तावद्द्वयसम् जानुमात्रम् परिमाणे द्वयसट् मात्रट् जानुद्वयसम् शिरोद्वयसम्
। पुरुषमात्रम् पुरुषहस्तिभ्यामण् च पुरुषः परिमाणमस्येति पौरुषम् हास्तिनम् यत्तदेत
द्भ्यः परिमाणे डावतुः यत्परिमाणमस्य यावान् तावान् एतावान् किमिदंभ्यां वतुस्तयोः की
शब्दस्यादेशः कियान् इयान् किमः संख्यापरिमाणे डतिर्वा का संख्या येषां ते कति संख्याया
अवयवे तयट् पञ्चावयवा अस्येति पञ्चतयी द्वित्रिभ्यां तयस्यायज्वा द्वितयम् द्वयम् त्रित
यम् त्रयम् उभादयट् उभयम् संख्यापूरणे द्वित्रिभ्यां तीयस्तेस्त्रश्च द्वयोः पूरणो द्वितीयः
तृतीयः षट्कतिकतिपयचतुरां थुक् षष्ठः संख्यापूरणः षष्ठः कतिथः कतिपयथः च
तुर्थः चतुरो यच्छयौ च लोपः तुर्यः तुरीयः पञ्चादेर्मट् पञ्चानां पूरणः पञ्चमः सप्तमः अष्टमः
नवमः दशमः एकादशादेर्डट् एकादशानां पूरणः एकादशः द्व्यष्टनोराल्वे संख्यायामु
त्तरपदे द्वादशः अष्टादशः त्रेस्त्रयस् त्रयोदशः विंशत्यादेर्वा तमट् विंशतितमः तिलो
पोऽडिति विंशः त्रिंशत्तमः त्रिंशः एकविंशतितमः एकविंशः शतादेर्नित्यम् शततमः द्विशत

स्वा
२६

स्वप्रकर्षे तु तमेष्ठाविति विवेकः द्वयोरतिशयेनैकः पंडितः पंडिततरः बहूनामतिशयेनै
कः श्रेष्ठः पंडिततमः ईयस्विष्ठेतु गुणवचनादेवाडिनोच अयमनयोरेषां वाऽतिशयेन पटुः प
टीयान् पटिष्ठः एवं लघीयान् लघिष्ठः इत्यादिः प्रियस्थिर [illegible] स्फिरउरु बहुल गुरु वृद्ध
तृप्रदीर्घ वृंदारक प्रशस्य स्थूल दूर युव ह्रस्व क्षिप्र क्षुद्राणां प्रस्थ स्फ वर वंहि गर
वर्षि त्रप द्राघ वृंद श्र स्थव दव यव ह्रस क्षेप क्षोद नेद साध ईयस्विष्ठेमनसु एरलोपश्च ह्रस्व प्र
शस्ययोर्ज्यादेशः ईयस ईलोपश्च अतिशयेन प्रियः प्रेयान् प्रेष्ठः स्थेयान् स्थेष्ठः २ स्फेयान् स्फेष्ठः ३
वरीयान् वरिष्ठः ४ वंहीयान् वं[illegible]हिष्ठः ५ गरीयान् गरिष्ठः ६ वर्षीयान् वर्षिष्ठः ७ त्रपीयान् त्रपिष्ठः
८ द्राघीयान् द्राघिष्ठः ९ वृन्दीयान् वृन्दिष्ठः १० स्थवीयान् स्थविष्ठः ११ दवीयान् दविष्ठः १२ यवीया
न् यविष्ठः १३ युवाल्पयोः कन्वा कनीयान् कनिष्ठः १४ स्वल्पीयान् स्वल्पिष्ठः १५ ह्रसीयान्
ह्रसिष्ठः १६ क्षेपीयान् क्षेपिष्ठः १७ क्षोदीयान् क्षोदिष्ठः १८ नेदीयान् नेदिष्ठः १९ साधीयान् साधि
ष्ठः २० अतिशयेन प्रशस्यो ज्यायान् ज्येष्ठः २१ प्रशस्य श्रेयान् श्रेष्ठः २२ बहोरिष्ठेयः ब
होः परस्येष्ठेकारस्य थिस्या [illegible] भूयिष्ठः भूयान् इमनि तु पक्षे प्रेमा स्थेमेत्यादि किमोऽव्य
न यादाराम् [illegible] तात्तरतमयोरामद्रव्यप्रकर्षे अतिशयेन कुलं कुलतराम् कुलतमाम् उच्चैस्तरां

श्रेयान् श्रे
ष्ठः ६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham

नम: संख्यायाः प्रकारे धा वाच्यामिति द्विधा एवं त्रिधा चतुर्धा पंचधा एकस्मात्प्रमुक्तौ ।
ऐकध्यम् एकधा द्वित्रिभ्यामेधाच्च मज्जौ वा द्वेधा द्वैधम् त्रेधा त्रैधम् क्रियाया अभ्या
वृत्तौ कृत्वस् पंच पंचवारानिति पंचकृत्वः सप्तकृत्वः सुद्धित्रिचतुर्भ्यः सुः द्विः त्रिः
चतुः एकस्य सकृदादेशश्च सकृत् बहुल्पार्थात् ●कारकात् शस् बहून्ददातीति बहुशः
अल्पशः स्तोकशः संख्यापरिमाणाभ्यां वीप्सायाम् द्वौ द्वौ ददातीति द्विशः त्रिशः पंचशः
माषं माषं ददातीति माषशः प्रस्थशः इतितज्जिताः वीप्सायां पदं द्विः इत्येव द्वंद्वसि चैयाह ति
ग्रामिन्यर्थः ग्रामो ग्रामो रमणीय सर्वे ग्रामा रमणीया इत्यर्थः परेर्वर्जने वा परि परि वंगेभ्यो वृ
ष्टो देवः परि वंगेभ्यो वा वंगान् परिहृत्येत्यर्थः उपर्यध्यधसः सामीप्ये उपर्युपरि ग्रामम्
ग्रामस्योपरि सामीप्य इत्यर्थः अध्यधि सुखं सुखस्योपरि सामीप्य एवं दुःखमित्यर्थः
अधोऽधो लोकं लोकस्याधः सामीप्य एवेत्यर्थः आबाधे रामेश्चि तस्यास्त्रियाः सम्प्रति कोप कु
सुम न मस्ते नेषुलतास्यास्या सुन्दर सुन्दर इति सौन्दर्यम् सम्प्रति देवदेव वन्द्योसि कोपि
दुर्विजित २ इदानीं सम्प्रति कुसुमे आनुकूल २ इति धनुः नमस्ते चोर २ तापि ...
एकशब्दो बहुव्रीहिवत् तेन विभक्तिलोपपुंस्त्वमनौ एकैकया कृत्वा एकैकस्मै देहि ए

२६

CC-0. Lal Bahadur Shastri University, Delhi. Digitized by Sarvagya Sharada Peetham